## The Lost Horoscopes ||16||

| | |
|---|---|
| अथ नष्टजातकाध्यायः ॥१६॥ | atha naṣṭajātakādhyāyaḥ ||16|| |
| गोसिंहौ जितुमाष्टमौ क्रियतुले कन्यामृगौ च क्रमात् | gosiṃhau jitumāṣṭamau kriyatule kanyāmṛgau ca kramāt |
| संवर्ग्या दशकाष्टसप्तविषयैः स्वसंख्यागुणाः । | saṃvargyā daśakāṣṭasaptaviṣayaiḥ svasaṃkhyāguṇāḥ | |
| जीवारास्फुजिदैन्दवाः प्रथमवच्छेषा ग्रहाः सौम्यव - | jīvārāsphujidaindavāḥ prathamavaccheṣā grahāḥ saumyava - |
| द्राशीनां नियतो विधिर्ग्रहयुतैः कार्या च तद्वर्गणा ॥१॥ | drāśīnāṃ niyato vidhirgrahayutaiḥ kāryā ca tadvargaṇā ||1|| |
| सप्ताहतं त्रिघनभाजितशेषमृक्षं | saptāhataṃ trighanabhājitaśeṣamṛkṣaṃ |
| दत्वाऽथवा नव शिशोध्य नवाऽथवा स्यात् । | datvā:'thavā nava śiśodhya navā:'thavā syāt | |
| एवं कलत्रसहजात्मजशत्रुभेभ्यः | evaṃ kalatrasahajātmajaśatrubhebhyaḥ |
| प्रष्टुर्वदेदुदयराशिवशेन तेषाम् ॥२॥ | praṣṭurvadedudayarāśivaśena teṣām ||2|| |
| वर्षर्तुमासतिथयो द्युनिशं हयुडुनि | varṣartumāsatithayo dyuniśaṃ hayuḍuni |
| वेलोदयर्क्षनवभागविकल्पनाः स्युः । | velodayarkṣanavabhāgavikalpanāḥ syuḥ | |
| भूयो दशादिगुणिताः स्विकल्पभक्ता | bhūyo daśādiguṇitāḥ svvikalpabhaktā |
| वर्षादयो नवकदानविशोधनाभ्याम् ॥३॥ | varṣādayo navakadānaviśodhanābhyām ||3|| |
| विज्ञेया दशकेष्वब्दा ऋतुमासातथैव च । | vijñeyā daśakeṣvabdā ṛtumāsātathaiva ca | |
| अष्टकेष्वपि मासार्ध तिथयश्च तथा स्मृताः ॥४॥ | aṣṭakeṣvapi māsārdha tithayaśca tathā smṛtāḥ ||4|| |
| दिवारात्रिप्रसूतिं च नक्षत्रानयनं तथा । | divārātriprasūtiṃ ca nakṣatrānayanaṃ tathā | |
| सप्तसङ्ख्येऽपि वर्गे तु नित्यमेवोपलक्षयेत् ॥५॥ | saptasaṅkhye:'pi varge tu nityamevopalakṣayet ||5|| |
| वेलामथ विलग्नं च होरामंशकमेव च । | velāmatha vilagnaṃ ca horāmaṃśakameva ca | |
| पञ्चकेषु विजानीयान्नष्टजातकसिद्धये ॥६॥ | pañcakeṣu vijānīyānnaṣṭajātakasiddhaye ||6|| |
| इति वराहमिहिराचार्यकृते लघुजातके | iti varāhamihirācāryakṛte laghujātake |
| नष्टजातकाध्यायः षोडशः । | naṣṭajātakādhyāyaḥ ṣoḍaśaḥ | |
| समाप्तोऽयं ग्रन्थः । | samāpto:'yaṃ granthaḥ | |

https://www.culturavedica.org/